# || નારાયણોપનિષત્ અથવા નારાયણ અથર્વશીર્ષ ||
કૃષ્ણયજુર્વેદીયા

ઓં સહ નાવવતુ સહ નૌ ભુનક્તુ | સહ વીર્યં કરવાવહૈ |
તેજસ્વિનાવધીતમસ્તુ | મા વિદ્વિષાવહૈ ||
ઓં શાંતિઃ શાંતિઃ શાંતિઃ ||
(પ્રથમઃ ખંડઃ
નારાયણાત્ સર્વચેતનાચેતનજન્મ)

ઓં અથ પુરુષો હ વૈ નારાયણોઽકામયત પ્રજાઃ સૃજેયેતિ |
નારાયણાત્પ્રાણો જાયતે | મનઃ સર્વેંદ્રિયાણિ ચ |
ખં વાયુર્જ્યોતિરાપઃ પૃથિવી વિશ્વસ્ય ધારિણી |
નારાયણાદ્ બ્રહ્મા જાયતે | નારાયણાદ્ રુદ્રો જાયતે |
નારાયણાદિંદ્રો જાયતે | નારાયણાત્પ્રજાપતયઃ પ્રજાયંતે |
નારાયણાદ્દ્વાદશાદિત્યા રુદ્રા વસવઃ સર્વાણિ ચ છંદાꣳસિ |
નારાયણાદેવ સમુત્પદ્યંતે | નારાયણે પ્રવર્તંતે | નારાયણે પ્રલીયંતે ||
(એતદૃગ્વેદશિરોઽધીતે |)

(દ્વિતીયઃ ખંડઃ
નારાયણસ્ય સર્વાત્મત્વં)

ઓં | અથ નિત્યો નારાયણઃ | બ્રહ્મા નારાયણઃ | શિવશ્ચ નારાયણઃ |
શક્રશ્ચ નારાયણઃ | દ્યાવાપૃથિવ્યૌ ચ નારાયણઃ |
કાલશ્ચ નારાયણઃ | દિશશ્ચ નારાયણઃ | ઊર્ધ્વશ્ચ નારાયણઃ |
અધશ્ચ નારાયણઃ | અંતર્બહિશ્ચ નારાયણઃ | નારાયણ એવેદꣳ સર્વં |
યદ્ભૂતં યચ્ચ ભવ્યં | નિષ્કલો નિરંજનો નિર્વિકલ્પો નિરાખ્યાતઃ
શુદ્ધો દેવ એકો નારાયણઃ | ન દ્વિતીયોઽસ્તિ કશ્ચિત્ | ય એવં વેદ |
સ વિષ્ણુરેવ ભવતિ સ વિષ્ણુરેવ ભવતિ ||
(એતદ્યજુર્વેદશિરોઽધીતે |)

(તૃતીયઃ ખંડઃ
નારાયણાષ્ટાક્ષરમંત્રઃ)

ઓમિત્યગ્રે વ્યાહરેત્ | નમ ઇતિ પશ્ચાત્ | નારાયણાયેત્યુપરિષ્ટાત્ |
ઓમિત્યેકાક્ષરં | નમ ઇતિ દ્વે અક્ષરે | નારાયણાયેતિ પંચાક્ષરાણિ |
એતદ્વૈ નારાયણસ્યાષ્ટાક્ષરં પદં |
યો હ વૈ નારાયણસ્યાષ્ટાક્ષરં પદમધ્યેતિ | અનપબ્રુવસ્સર્વમાયુરેતિ |
વિંદતે પ્રાજાપત્યꣳ રાયસ્પોષં ગૌપત્યં |
તતોઽમૃતત્વમશ્નુતે તતોઽમૃતત્વમશ્નુત ઇતિ | ય એવં વેદ ||
(એતત્સામવેદશિરોઽધીતે | ઓં નમો નારાયણાય)

(ચતુર્થઃ ખંડઃ
નારાયણપ્રણવઃ)

પ્રત્યગાનંદં બ્રહ્મપુરુષં પ્રણવસ્વરૂપં | અકાર ઉકાર મકાર ઇતિ |
તાનેકધા સમભરત્તદેતદોમિતિ |
યમુક્ત્વા મુચ્યતે યોગી જન્મસંસારબંધનાત્ |

## || નારાયણોપનિષત્ અથવા નારાયણ અથર્વશીર્ષ ||
કૃષ્ણયજુર્વેદીયા

ઓં નમો નારાયણાયેતિ મંત્રોપાસકઃ | વૈકુંઠભુવનલોકં ગમિષ્યતિ |
તદિદં પરં પુંડરીકં વિજ્ઞાનઘનં | તસ્માત્તટિદાભમાત્રં |

બ્રહ્મણ્યો દેવકીપુત્રો બ્રહ્મણ્યો મધુસૂદનોં | બ્રહ્મણ્યો મધુસૂદનયોં
સર્વભૂતસ્થમેકં નારાયણં | કારણરૂપમકાર પરં બ્રહ્મોં |
એતદથર્વશિરોયોધીતે ||
વિદ્યાડધ્યયનફલં |
પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ |
સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ |
માધ્યંદિનમાદિત્યાભિમુખોડધીયાનઃ પંચમહાપાતકોપપાતકાત્ પ્રમુચ્યતે |
સર્વ વેદ પારાયણ પુણ્યં લભતે |
નારાયણસાયુજ્યમવાપ્નોતિ નારાયણ સાયુજ્યમવાપ્નોતિ |
ય એવં વેદ | ઇત્યુપનિષત્ ||
ઓં સહ નાવવતુ સહ નૌ ભુનક્તુ | સહ વીર્યં કરવાવહૈ |
તેજસ્વિનાવધીતમસ્તુ | મા વિદ્વિષાવહૈ ||
ઓં શાંતિઃ શાંતિઃ શાંતિઃ ||
શાંતાકારં ભુજગશયનં પદ્મનાભં સુરેશં
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાંગં |
લક્ષ્મીકાંતં કમલનયનં યોગિભિર્ધ્યાનગમ્યં
વંદે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથં ||